# Lunthakarditaih Balakabalikastribhih Kritam Purushottama Stotram

# લુણ્ઠકાર્દિતૈઃ બાલકબાલિકાસ્ત્રીભિઃ કૃતં પુરુષોત્તમસ્તોત્રમ્ ૧૦

## Document Information

Text title : Lunthakarditaih Balakabalikastribhih Kritam Purushottama Stotram

File name : luNThakArditaiHbAlakabAlikAstrIbhiHkRRitaMpuruShottamastotram10.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 191/1-87||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# લુણ્ઠકાર્દિતૈઃ બાલકબાલિકાસ્ત્રીભિઃ કૃતં પુરુષોત્તમસ્તોત્રમ્ ૧૦

શ્રીપુરુષોત્તમ ઉવાચ ।
શ઼ૃણુ લક્ષ્મિ બાલિકાશ્ચ બાલકાશ્ચાપિ વિહ્વલાઃ ।
અસ્તુવન્માં સ્વરક્ષાર્થં યદહં શ્રુતવાઁસ્તદા ॥ ૧॥

દિવોદાસસુતાં દિવ્યાદેવીં ભાગ્યવિહીનકામ્ ।
કષ્ટાદ્વિમુચ્ય નૈજાં યશ્ચક્રેઽક્ષરેઽનયચ્ચ તામ્ ॥ ૨॥

બાલકૃષ્ણઃ સ ભગવાન્ નઃ પ્રરક્ષતુ સેવિકાઃ ।
ભિલ્લીભિલ્લૌ તવ સાધોર્યોગાન્મોક્ષં ગતૌ પુરા ॥ ૩॥

સુબાહુનૃપતિર્ભાર્યાસહિતઃ સાધુસંશ્રયાત્ ।
તવ પ્રતાપતઃ કૃષ્ણ મોક્ષમાર્ગં યયૌ પુરા ॥ ૪॥

અશોકસુન્દરીં કન્યાં સતીશઙ્કરપુત્રિકામ્ ।
ત્વં રરક્ષ પુરા કૃષ્ણ નઃ પ્રરક્ષય સેવિકાઃ ॥ ૫॥

વિહુણ્ડસ્ય વિનાશાર્થં નારીરૂપોઽભવઃ પુરા ।
કામોદાયાઃ પતિસ્ત્વં સ નઃ પ્રરક્ષતુ સેવિકાઃ ॥ ૬॥

શુકમોક્ષપ્રદસ્ત્વં નઃ પ્રરક્ષ નિજબાલિકાઃ ।
ખશો નામ્ના વિષ્ણુદાસો રામણી ચાસ્ય ભામિની ॥ ૭॥

લીલાવતી ચ તત્કન્યા પુરોદ્ધૃતાસ્ત્વયા પ્રભો ।
ગણિકાનાં પુરા કૃષ્ણ પાપાનિ તુ ત્વયા વિભો ॥ ૮॥

કૃત્વા પુણ્યસ્વરૂપાણિ પુણ્યજનાન્ વ્યધાસ્તદા ।
ગણિકા યોગિનીશ્ચાપિ કૃતવાઁસ્ત્વં પુરા પ્રભો ॥ ૯॥

રક્ષાનામ્ન્યાઃ શ્વપચ્યાસ્ત્વં સુમરસ્ય તુ યોષિતઃ ।
મુક્તિદાતાઽભવઃ કૃષ્ણ નઃ સ રક્ષતુ સેવિકાઃ ॥ ૧૦॥

કૌશિકં ગરુડં ચક્રે ગાયકં યઃ પુરા પ્રભુઃ ।

માલવં નામ વૈશ્યં ચ તથાઽન્યાન્ ગાનકોવિદાન્ ॥ ૧૧॥

બ્રહ્મલોકં હ્યનયદ્ યો નઃ સ રક્ષતુ સેવિકાઃ ।
હરિમિશ્રં બ્રાહ્મણં યો દદૌ મોક્ષં સ પાતુ નઃ ॥ ૧૨॥

ચિદમ્બરામહારાજ્ઞ્યૈ જિષ્ણુપત્ન્યૈ પુરા ભવાન્ ।
ગદાં સમર્પ્ય રક્ષાં ચાઽકરોદ્ભદ્રકરાક્ષસાત્ ॥ ૧૩॥

પ્રજાશ્ચ જીવિનાસ્તસ્યાઃ સ નો રક્ષતુ સેવિકાઃ ।
રણેશ્વર્યઃ કૃતા નૈજા બ્રહ્મપ્રિયા ગદાસુતાઃ ॥ ૧૪॥

યેન નારાયણેનાપિ કૃષ્ણઃ સ નઃ પ્રરક્ષતુ ।
રણેશ્વરાસ્તથા મુક્તાઃ કૃતા યેન સ રક્ષતુ ॥ ૧૫॥

બિન્દુમત્યાઃ કૃતો યેન મોક્ષો યયાતિયોષિતઃ ।
સ હરિલુણ્ઠકેભ્યશ્ચાઽવનં કરોતુ માધવઃ ॥ ૧૬॥

પરશુચન્દ્રકો યેન નારાયણેન તારિતઃ ।
સોઽયં કાન્તગુણઃ કૃષ્ણો રક્ષતુ નિજસેવિકાઃ ॥ ૧૭॥

સુચન્દ્રિકાં ગોપપત્નીં ગોપાલં તત્પતિં તથા ।
અનયદ્યોઽક્ષરં ધામ સ કૃષ્ણો નઃ પ્રરક્ષતુ ॥ ૧૮॥

હરિપ્રથમનોઃ પત્ની બ્રહ્મપથાઽક્ષરં પ્રતિમ્ ।
પ્રાપિતા યેન હરિણા સ કૃષ્ણો નઃ પ્રરક્ષતુ ॥ ૧૯॥

ગૃધ્રાણાં મોક્ષણં યેન કૃતં પુરા પરાત્મના ।
બાલકૃષ્ણો હરિકૃષ્ણઃ સ કૃષ્ણો નઃ પ્રરક્ષતુ ॥ ૨૦॥

જીવચન્દ્રાય મુક્તિં યો દદૌ કૃષ્ણઃ સ રક્ષતુ ।
શતાનન્દવિનોદિન્યોઃ પુત્રાણાં મોક્ષણં કૃતમ્ ॥ ૨૧॥

યેન શ્રીહરિણા કૃષ્ણઃ સ એવ નઃ પ્રરક્ષતુ ।
કાશીવારાઙ્ગનાભ્યો યો મુક્તિદઃ સ પ્રરક્ષતુ ॥ ૨૨॥

વૃષાયનેન ચટકા યદ્બલેન પ્રરક્ષિતા ।
બાલકૃષ્ણોઽનાદિકૃષ્ણઃ સ કૃષ્ણો નઃ પ્રરક્ષતુ ॥ ૨૩॥

ચિત્રકેતોશ્ચ માલત્યા રાજ્ઞ્યા મુક્તિઃ કૃતા પુરા ।
યેન શ્રીબાલકૃષ્ણેન કૃષ્ણો નઃ સ પ્રરક્ષતુ ॥ ૨૪॥

શ્રેષ્ઠા યેન કૃતાઃ સન્તઃ સ નઃ કૃષ્ણઃ પ્રરક્ષતુ ।
કૃશાઙ્ગકઃ કૃતો યેન કૃશાનુઃ સ પ્રરક્ષતુ ॥ ૨૫॥

ભઙ્ગાસ્વનઃ કૃતો યેન નરો નારી મુહુર્મુહુઃ ।
સ એવ ભગવાન્ કૃષ્ણો રક્ષત્વત્ર સ્વસેવિકાઃ ॥ ૧૬॥

વિપુલં ચ રુચિં દેવશર્માણં યો રરક્ષ હ ।
મોક્ષદો ભગવાન્ કૃષ્ણો દુઃખાદસ્માત્ પ્રરક્ષતુ ॥ ૨૭॥

ગોકર્ણાખ્યે પુરા તીર્થે ઋષયો યેન વાસિતા ।
સ એવ ભગવાનસ્માન્ લુણ્ઠકેભ્યઃ પ્રરક્ષતુ ॥ ૨૮॥

કુવલાશ્વં તથોત્તઙ્કં સત્યવ્રતં ચ ગાલવમ્ ।
શ્રેયસે કલ્પયામાસ યઃ સ કૃષ્ણઃ પ્રરક્ષતુ ॥ ૨૯॥

યત્પ્રતાપેન ચ પ્રણદ્બ્રહ્મસાધુઃ પ્રતાપવાન્ ।
સમભવત્ સ કૃષ્ણો નો લુણ્ઠકેભ્યઃ પ્રરક્ષતુ ॥ ૩૦॥

કેશરિણીસુતશ્ચાऽऽલમ્બાયનો મુક્તિમાપ વૈ ।
યત્પ્રતાપેન કૃષ્ણઃ સ લુણ્ઠકેભ્યઃ પ્રરક્ષતુ ॥ ૩૧॥

ગોકર્ણસ્થાન્ લક્ષસાધૂન્ નિન્યે ધામાક્ષરં તુ યઃ ।
બાલકૃષ્ણં પ્રિયઃ કાન્તો નઃ પ્રરક્ષતુ વલ્લભાઃ ॥ ૩૨॥

શબરો રાક્ષસો યેન મોચિતો ભવબન્ધનાત્ ।
ગૃધ્રશ્ચ શ્વપચશ્ચાપિ સ કૃષ્ણોऽવતુ સેવિકાઃ ॥ ૩૩॥

ખ્યાતિં શાપપરાં વીક્ષ્ય ચકર્ત યસ્તુ તચ્છિરઃ ।
સ નઃ કૃષ્ણો લુણ્ઠકેભ્યઃ પ્રરક્ષતુ સ્વસેવિકાઃ ॥ ૩૪॥

ભારુણ્ડઃ પુષ્કસો યેન તારિતઃ સ પ્રરક્ષતુ ।
વૃષાદર્ભિઃ કૃતો યેન મુક્તઃ કૃષ્ણઃ સ રક્ષતુ ॥ ૩૫॥

નરશાયસ્તસ્કરસ્તુ મોચિતો યેન ચક્રિણા ।
ધનિનો મોચિતા યેન સ કૃષ્ણોऽવતુ સેવિકાઃ ॥ ૩૬॥

કુન્દધર્માऽવિતા યેનાऽવિતશ્ચ જાઙ્ઘલામખઃ ।
બાલકૃષ્ણો દિવ્યકાન્તઃ કન્યકા નઃ પ્રરક્ષતુ ॥ ૩૭॥

યેન શમ્ભલવારોऽપિ પ્રજયા સહ મોચિતઃ ।
બાલઃકૃષ્ણો વલ્લભોऽત્ર પ્રરક્ષતુ સ્વસેવિકાઃ ॥ ૩૮॥

દેવાનીકદિવ્યવંશે બાલકૃષ્ણો વ્યજાયત ।
સ એવ ભગવાનત્ર પ્રરક્ષતુ સ્વસેવિકાઃ ॥ ૩૯॥

નમોઽનાદિકૃષ્ણનારાયણાય સ્વામિને નમઃ ।
નમઃ શ્રીકમ્ભરાલક્ષ્મીગોપાલજનુષે નમઃ ॥ ૪૦॥

દીર્ઘશીલો વિપ્રવર્યો મોચિતો યમપાશતઃ ।
યેન શ્રીહરિણા સોઽયં પ્રરક્ષતુ સ્વદાસિકાઃ ॥ ૪૧॥

બ્રહ્મસતી બ્રાહ્મણી યા મોચિતા પરમાત્મના ।
સોઽયં નો ભગવાન્નાથઃ પ્રરક્ષતુ સ્વસેવિકાઃ ॥ ૪૨॥

કાલન્ધરા મહારાજ્ઞી વૈવર્ત્તો નામ ભૂપતિઃ ।
મોચિતૌ યેન કૃષ્ણેન સ કૃષ્ણોઽવતુ સેવિકાઃ ॥ ૪૩॥

રોમપાદસ્ય વૈ પુત્રો વૃષગમોઽપિ વિષ્ણુના ।
મોચિતો યેન કૃષ્ણેન સ કૃષ્ણોઽવતુ સેવિકાઃ ॥ ૪૪॥

નગ્નભઙ્ગઃ પુરા ચૌરો મોચિતો યેન વિષ્ણુના ।
બાલકૃષ્ણઃ કૃષ્ણનારાયણો નઃ સ પ્રરક્ષતુ ॥ ૪૫॥

ભણ્ડાસુરો હતો લલિતાદ્વારા યેન ચક્રિણા ।
સ ચાસ્માનત્ર કૃષ્ણશ્રીકૃષ્ણો રક્ષતુ સેવિકાઃ ॥ ૪૬॥

લલિતામાનસીકન્યાઃ કોટિશઃ સ્વીકૃતાઃ પુરા ।
યેન શ્રીપરમેશેન સ કૃષ્ણોઽવતુ સેવિકાઃ ॥ ૪૭॥

લોહાઙ્ગારસ્ય વૈશ્યસ્ય મોક્ષકૃન્નઃ પ્રરક્ષતુ ।
પીવર્યાદ્યા વ્રતે યેન પૂર્ણકામા નિરૂપિતાઃ ॥ ૪૮॥

સોઽયં કૃષ્ણો લુણ્ઠકેભ્યો નઃ પ્રરક્ષતુ દાસિકાઃ ।
વસિષ્ઠાઽગસ્ત્યકૌ શાપાન્મોચિતૌ યેન શાર્ઙ્ગિણા ॥ ૪૯॥

અનાદિશ્રીકૃષ્ણનારાયણો નઃ સ પ્રરક્ષતુ ।
પરુષો લુબ્ધકો યેન મોચિતો ભાર્યયા સહ ॥ ૫૦॥

પુષ્કરવાહનસ્યાપિ મોક્ષકૃન્નઃ પ્રરક્ષતુ ।
સરોજિની કુમ્ભકર્ત્રી સતીશ્વરીકૃપાન્વિતા ॥ ૫૧॥

પદ્મિની સાઽભવદ્યસ્ય કૃપયા કમલાસમા ।

સ શ્રીકૃષ્ણઃ પ્રભુશ્ચાસ્માન્ લુણ્ઠકેભ્યઃ પ્રરક્ષતુ ॥ ૫૨॥

ધર્મતપસો વિપ્રસ્ય રક્ષણં કૃતવાઁસ્તુ યઃ ।
સુરથસ્ય મનુત્વં ચ કૃતવાન્ શ્રીપતિસ્તુ યઃ ॥ ૫૩॥

ધનવર્મા દિવં યેન પ્રેષિતઃ પરમાત્મના ।
બલીશ્વરસ્તથા રાજ્યે સ્થાપિતો માનવે દ્વિજઃ ॥ ૧૪॥

આનન્દવર્ણી યેનાઽપિ સ્થાપિતો માનવે તથા ।
રાજ્યે ધૃણેષિકઃ શૂદ્રઃ સ્થાપિતો યેન માનવે ॥ ૫૫॥

ભૂતિશ્ચ તરિતો યેન કૃષ્ણો રક્ષતુ સેવિકાઃ ।
અસુરો બાલકો યેનોદ્ધૃતોઽસ્ય મણયઃ કૃતાઃ ॥ ૫૬॥

બાષ્કલિર્નાશિતો યેન વિષ્ણુર્નઃ સમ્પ્રરક્ષતુ ।
ગજનારાયણેનાપિ પુરુકૃસરો ઘાતિતઃ ॥ ૫૭॥

પ્રલમ્બો નાશિતો યેન મત્સ્યાત્મકેન શાર્ઙ્ગિણા ।
ભીમરથો ઘાતિતશ્ચ કૂર્મરૂપેણ યેન વૈ ॥ ૫૮॥

શાન્તશત્રુર્ઘાતિતશ્ચ હંસરૂપેણ યેન હિ ।
મહાકાલો નાશિતશ્ચ હયગ્રીવેણ યેન તુ ॥ ૫૯॥

હિરણ્યાક્ષવિહન્તા સ કૃષ્ણોઽવતુ સ્વસેવિકાઃ ।
વામનોઽવતુ કૃષ્ણશ્ચ કાલકાક્ષવિનાશકૃત્ ॥ ૬૦॥

બલિશત્ર્વસુરહન્તા હરિર્દુઃખં વ્યપોહતુ ।
દશગ્રીવવિહન્તા ચ નારીરૂપોઽવતુ પ્રભુઃ ॥ ૬૧॥

તારકઘ્નો હરિર્નપુંસકરૂપોઽપિ રક્ષતુ ।
ટિટ્ટિભો વિહતો યેન માયૂરરૂપિણા પુરા ॥ ૬૨॥

શુચિશ્ચ ઘાતિતો યેન ચક્રિણા નઃ સ રક્ષતુ ।
સાધુભાવાયનર્ષિશ્ચ તથા શ્રીમાનસસ્ય ચ ॥ ૬૩॥

ચિદાનન્દસ્યાપિ મોક્ષકૃત્ કૃષ્ણો નઃ પ્રરક્ષતુ ।
સદ્વિદ્યાયનપત્નીં યઃ શ્રુતિફલાં હ્યમોક્ષયત્ ॥ ૬૪॥

અલર્કજનનીમોક્ષં કૃતવાન્ સ પ્રરક્ષતુ ।
મુક્તિસ્રોતાયનશ્ચાપિ સિદ્ધિવેષાયનસ્તથા ॥ ૬૫॥

અયાચિતાઞ્જલિભાર્યા ભિક્ષાયનઋષિઃ પતિઃ ।
મુક્તા યસ્યાઽઽશ્રયેણૈષઃ શ્રીકૃષ્ણો નઃ પ્રરક્ષતુ ॥ ૬૬॥

માતા નિત્યાશ્રયા પુત્રઃ કેશી યેન પ્રમોચિતૌ ।
બાલકૃષ્ણો મહારાજઃ સ નસ્ત્વત્ર પ્રરક્ષતુ ॥ ૬૭॥

માતા તુ ચારણી પુત્રો વ્યાઘ્રશ્ચ યેન તારિતૌ ।
કૂટદેવઃ પિતા સાધુઃ શ્યામશ્ચ યેન તારિતૌ ॥ ૬૮॥

ઉત્તમશ્ચાપિ ભૂદેવો દેવાયનઋષિસ્તથા ।
કષ્ટાત્ પ્રમોચિતૌ યેન કૃષ્ણો રક્ષતુ સેવિકા ॥ ૬૯॥

યેન વિરાલકો વૈશ્યઃ સકુટુમ્બઃ સમુદ્ધૃતઃ ।
બાલકૃષ્ણઃ પ્રિયપ્રાણો લુણ્ઠકેભ્યઃ પ્રરક્ષતુ ॥ ૭૦॥

પૃથ્વીધરો નૃપો મધુવિન્દા રાજ્ઞી સમુદ્ધૃતૌ ।
તથા દુર્વોઢકો દીનશ્ચોદ્ધૃતો યેન સોઽવતુ ॥ ૭૧॥

સાગરઃ શૂદ્રકશ્ચાપિ વેનપાલાભિધો નૃપઃ ।
હીરુકા શૂદ્રપત્ની ચ રક્ષિતા યેન સોઽવતુ ॥ ૭૨॥

વૃક્ણદેવો ભાવશૂરઃ શીલધર્મા સતી તથા ।
મોચિતા યેન કૃષ્ણેન સોઽયં રક્ષતુ સેવિકાઃ ॥ ૭૩॥

મઞ્જુલકેશો ભૂદેવઃ પાશુપતેશવિપ્રરાટ્ ।
બાણાઙ્ગણસ્તથા શૂદ્રો રક્ષિતા યેન સોઽવતુ ॥ ૭૪॥

મૃતાદનઃ સન્તદાસો ધર્મશાલાયનસ્તથા ।
શઙ્કુધરશ્ચોદ્ધૃતાશ્ચ યેન સોઽવતુ સેવિકાઃ ॥ ૭૫॥

લુણ્ઠકાધિપતિશ્ચાયં નામ્ના સામન્તવિક્રમઃ ।
લુણ્ઠયત્યતિસર્વસ્વં કૃષ્ણ હા કૃષ્ણ રક્ષ નઃ ॥ ૭૬॥

તવ સ્મોઽત્ર તવ સ્મોઽત્ર ત્વત્સેવિકાઃ પ્રરક્ષય ।
અન્તરાત્મન્ વ્યાપકાત્મન્ ભૂમન્નત્ર પ્રરક્ષય ॥ ૭૭॥

બાલકાશ્ચાપિ વૈ કૃષ્ણસ્તવનં ચક્રિરે તથા ।
શ્રુત્વાઽહં સહસા તત્ર શતરૂપોઽભવં રમે ॥ ૭૮॥

અશ્વવારા ઉષ્ટ્રવારાઃ સશસ્ત્રા ભૂભૃતો ભટાઃ ।
પઞ્ચાશદ્વેગતો દૂરાદાગતા રક્ષણાય વૈ ॥ ૭૯॥

ઉચ્ચૈરાક્રોશમાદધ્યુઃ સજ્જાશ્ચૌરા ભવન્ત્વિતિ ।
મારયિષ્યામ એવાઽત્ર જાયન્તાં માતૃપુત્રકાઃ ॥ ૮૦॥

એવં નાદાન્ શ્રાવયન્તો સ્ફોટયન્તો હિ ધૂષ્કૃતીઃ ।
ઉષ્ટ્રાઽશ્વાદ્યૈઃ ક્ષણાદ્દિક્ષુ દશસ્વાવૃત્તયઁશ્ચ તાન્ ॥ ૮૧॥

વર્તુલે ચૌરલોકાઁસ્તાનાવૃત્ય રાજપાર્ષદાઃ ।
ધર્ષયિતું દણ્ડયિતું તાડયિતું પુરોઽગમન્ ॥ ૮૨॥

તાવત્તે રોષમાપન્ના જીવનાશાં વિહાય વૈ ।
દુદ્રુવુર્મધ્યદેશાચ્ચ ધૂષ્કૃતીસ્ફોટકારિણઃ ॥ ૮૩॥

તદા મે પાર્ષદૈર્લક્ષ્મિ ધૂષ્કૃતયઃ સ્ફોટિતા દ્રુતમ્ ।
યુદ્ધં પરસ્પરં જાતં ધૂષ્કૃતીગોલિકામયમ્ ॥ ૮૪॥

મયા તે ગોલિકાયન્ત્રૈર્વિદ્ધાઃ સર્વેઽતિગર્વિતાઃ ।
મૃતાસ્તે તત્ર પઞ્ચાશત્સર્વે ગોલ્યભિભેદિતાઃ ॥ ૮૫॥

તાન્ સર્વાનનયં સ્વર્ગં મમ હસ્તૈર્મૃતાનતઃ ।
મોચિતાન્ ભક્તવણિજસ્તતોઽહં સમસાન્ત્વયમ્ ॥ ૮૬॥

તે સર્વે શરણં પ્રાપ્તા નરા નાર્યશ્ચ બાલિકાઃ ।
બાલાશ્ચ પેતુશ્ચરણે મમ સૈન્યપરૂપિણઃ ॥ ૮૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૯૧-અધ્યાયાન્તર્ગતં લુણ્ઠકાર્દિતૈઃ બાલક-બાલિકા-સ્ત્રીભિઃ કૃતં
પુરુષોત્તમસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૯૧/૧-૮૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 191/1-87..

Proofread by PSA Easwaran

*Lunthakarditaih Balakabalikastribhih Kritam Purushottama Stotram*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*